# Shri Sharadamatri Shodashika

# શ્રીશારદામાતૃ ષોડશિકા

## Document Information

Text title : Shri Sharadamatri Shodashika

File name : shAradAmAtRRiShoDashikA.itx

Category : deities_misc, gurudev, rAmakRiShNa

Location : doc_deities_misc

Author : Jagannathadeva Sharma

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# શ્રીશારદામાતૃ ષોડશિકા

શ્રીરામ-શ્યામાગત-દેહાઽતુલ્ય-કન્યકાભાવ-દર્શિની
　　સુસ્નિગ્ધ-જ્યેષ્ઠ સ્વસૃ-રૂપા પ્રાયશોઽખિલ-ગ્રામ-વાસિનામ્ ।
જાયાઽપિ બ્રહ્મ-વ્રત-નિષ્ઠા ભર્તૃ-દિવ્ય-ભાવ-પ્રકાશિની
　　દેવી ત્વં માતા સકલાનાં સઙ્ઘપાલિકાં પાપ-હારિણી ॥ ૧॥

સાક્ષાન્માયા માયાવિષ્ટાઽસામાન્યાઽપિ ત્વં સામાન્યા ।
વિદ્યા-ન્યૂર્ના ગ્રામ્યાઽપિ ત્વં બ્રહ્મ-જ્ઞાનાદર્શ-પ્રાણા ॥ ૨॥

શારદે ! સારદાત્રી ત્વં સદા વિશ્વાર્તિ-હારિણી ।
ગૂઢ-રૂપે ! મહા-દેવિ ! કસ્ત્વાં સ્તોતુમિહાઽર્હતિ ॥ ૩॥

દીન-વેશા પતિ-પ્રાણા સર્વ-સહા ધરેવ તુ ।
રાજરાજેશ્વરી હિ ત્વં કસ્ત્વાં સ્તોતુમિહાઽર્હતિ ॥ ૪॥

અજનયન્ત્યાપિ સ્વીયાન્ માનવીવ તુ ગર્ભજાન્ ।
જનની સર્વજીવાનાં કસ્ત્વાં સ્તોતુમિહાઽર્હતિ ॥ ૫॥

ગલિત-સ્નેહ-ધારાઽપિ બગલારૂપધારિણી ।
ધૃત-જિહ્વા પ્રમત્તસ્ય કસ્ત્વાં સ્તોતુમિહાઽર્હતિ ॥ ૬॥

અકિઞ્ચનાઽપિ માતસ્ત્વં ત્યક્તવિત્તૈષણા સ્વતઃ ।
દર્શિત-ત્યાગ-નિષ્ઠાહો કસ્ત્વાં સ્તોતુમિહાઽર્હતિ ॥ ૭॥

નારી-રૂપ-ધરાઽપિત્વં પું-સ્ત્રી-ધર્મોપદેશિની ।
કામિનીત્યાગ-વક્ત્રી ચ કસ્ત્વાં સ્તોતુમિહાઽર્હતિ ॥ ૮॥

ભાર્યાઽપિ સ્વામિનં દેવં “કાલી’તિ સંલપન્ત્યભૂઃ ।
પ્રયાણ-સમયે માતઃ! કસ્ત્વાં સ્તોતુમિહાર્હતિ ॥ ૯॥

યોગાશ્રમે સ્વયં માતરભ્યર્ચ્યાઽહો નિજાકૃતિમ્ ।
નાથાલેખ્યેન સાકન્ત્વભેદ-કાષ્ઠાં પરાં ગતાઃ ॥ ૧૦॥

શક્તિમતા યથા શક્તિસ્તાદાત્મ્યરૂપતઃ સ્થિતા ।
તથા ત્વં રામકૃષ્ણેણ કસ્ત્વાં સ્તોતુમિહાઽર્હતિ ॥ ૧૧॥

ભાર્યા દેવીશ્વરી માતા શ્રીરામકૃષ્ણ દેવતઃ ।
અમેય ભાવરૂપા ત્વં કસ્ત્વાં સ્તોતુમિહાઽર્હતિ ॥ ૧૨॥

હે માતઃ શારદે! શ્રી રામકૃષ્ણ-પૂજિતે!
 માં રક્ષાઽનાથકં દીનાર્ત-સેવકં ભવે ।
સંસાર-વ્યાકુલં ભીતં ચિરં ભવાઽર્ણવે ।
 મગ્નં મોહપ્રદે યાચે કૃપાલવં નુ તે ॥ ૧૩॥

ત્વં દુર્ગા કાલિકા ચણ્ડી મહા-સરસ્વતી
 દેવી વિદ્યા પરાસૃષ્ટિ-સ્થિતિ પ્રણાશ-કૃત્ ।
આદ્યા શક્તિઃ રથો ધાત્રી મહા-રમાઽસિ મે
 તત્ત્વં કો વેત્તિ તે શ્રીરામકૃષ્ણ એવ વૈ ॥ ૧૪॥

ૐ-ઐં-હ્રીં-બીજ-પ્રતિપાદ્યે ! સર્વદેવદેવી-સ્વરૂપિણી !
 માતસ્ત્વં કો નુ પ્રણમેન્ન ક્ષૌણિમણ્ડલે મઙ્ગલક્રમઃ ।
વક્તું નાલં કોઽપિ સુમેધાસ્તે વિચિત્રલીલા-સુવૈભવં
 કાલગ્રસ્તં માઽતિવિમૂઢં રક્ષદેવિ ! સર્વાર્થ સાધિકે ॥ ૧૫॥

નૂમઃ સર્વાધારાં પ્રણતજનસંસાર-તરણીં
 જગન્માતૃત્વે વૈ ફલહરણ કાલ્યર્ચન તિથૌ ।
સ્તુતાં દેવીં પત્યા નિખિલ મનુજાનાં પર હિતે
 રતાં દિવ્યાચારાં સકલ વરદાં શારદા-મણિમ્ ॥ ૧૬॥

ઇતિ  શ્રીજગન્નાથદેવશર્મણા વિરચિતા “શ્રીશ્રીશારદામાતૃષોડશિકા” સમાપ્તા ।

Proofread by Aruna Narayanan

*Shri Sharadamatri Shodashika*

pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*